Sch. G. र, ज, र, ज, र ( 4. 4. 4. 3, or 7. 8 ).

Ex. सा सुवर्णकेतकं विकाशि भृंगपूरितं
पंचबाणबाणजालपूर्णहेतितूणकम् ।
राधिका वितर्क्य माधवाद्य मासि माधवे
मोहमेति निर्भरं त्वया विना कलानिधे ॥

(2) **मालिनी**

Def. ननमयययुतेयं मालिनी भोगिलोकैः ।

Sch. G. न, न, म, य, य ( 8. 7 )

Ex. शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्यावतीर्णा ।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥ R. 6. 85.

(3) **लीलाखेल.**

Def. एकन्यूनौ विद्युन्मालापादौ चेल्लीलाखेलः ।

Sch. G. म, म, म, म, म.

Ex. मा कांते पक्षस्यांते पर्याकाशे देशे स्वाप्सीः
कांतं वक्त्रं वृत्तं पूर्णं चंद्रं मत्वा रात्रौ चेत्।
क्षुत्क्षामः प्राटंश्चेतश्चेतो राहुः क्रूरः प्रायात्
तस्माद् ध्वांते हर्म्यस्यांते शय्यैकांते कर्तव्या ॥
Sar. K.

(4) **शशिकला**

Def. गुरुनिधनमनुलघुरिह शशिकला।

Sch. G. न, न, न, न, स ( all short syllables except the last ).

Ex. मलयजतिलकसमुदितशशिकला
व्रजयुवतिलसदलिकगमनता ।
सरसिजनयनहृदयसलिलनिधिं
व्यतनुत विततरभसपरितरलम् ॥

*Metres with 16 Syllables in a quarter.*

( अष्टि )

(1) **चित्र**

Def. चित्रसंज्ञमीरितं रजौ रजौ रगौ च वृत्तम् ।

Sch. G. र, ज, र, ज, र, ग ( 8. 8. or 4. 4. 4. 4. )

Ex. विद्रुमारुणाधरौष्ठशोभिवेणुवाद्यहृष्ट-
वल्लवीजनांगसंगजातपुरघकंठकांग ।
त्वां सदैव वासुदेव पुण्यलभ्यपाद देव
वन्यपुष्पचित्रकेश संस्मरामि गोपवेश ॥

(2) **पंचचामर**

Def. प्रमाणिकापदद्वयं वदंति पंचचामरम् ।
or जरौ जरौ ततो जगौ च पंचचामरं वदेत्

Sch. G. ज, र, ज, र, ज, ग ( 8. 8. or 4. 4. 4. 4 )

Ex सुरद्रुमूलमंडपे विचित्ररत्ननिर्मिते
लसद्वितानभूषिते सलीलविभ्रमालसम् ।
सुरांगनाभवल्लवीकरप्रपंचचामर-
स्फुरत्समीरवीजितं सदाच्युतं भजामि तम् ॥

(3) **वाणिनी**

Def. नजभजरैर्यदा भवति वाणिनी गयुक्तैः ।

Sch. G. न, ज, भ, ज, र, ग.

Ex. स्फुरतु ममाननेऽद्य ननु वाणि नीतिरम्यं
तवचरणप्रसादपरिपाकतः कवित्वम् ।
भवजलराशिपारकरणक्षमं मुकुंदं
सततमहं स्तवैः स्वचरितैः स्तवामि नित्यम् ॥

*Metres with 17 Syllables in a quarter.*

( अत्यष्टि )

(1) **चित्रलेखा**

( Also called अतिशायिनी )

Def. ससजा भजगा गु दिक्स्वरैर्भवति चित्रलेखा ।

Sch. G. स, स, ज, भ, ज, ग, ग ( 10. 7 )

Ex. इति धौतपुरंध्रिमत्सरान् सरसि मज्जनेन
श्रियमाप्तवतोऽतिशायिनीमपमलांगभासः ।
अवलोक्य तदैव यादवानपरवारिराशेः
शिशिरेतररोचिषाप्यपां ततिषु मंक्तुमीषे॥Si 8.71

(2) **नर्दटक**

Def. यदि भवतो नजौ भजजला गुरु नर्दटकम् ।

Sch. G. न, ज, भ, ज, ज, ल, ग ( 8. 9 )

Ex. तरुणतमालनीलबहुलोन्नमदंबुधराः
शिशिरसमीरणाधुतनूतनवारिकणाः ।
कथमवलोकयेयमधुना हरिहेतिमती
मंदकलनीलकंठकलहैर्मुखराः ककुभः ॥
Mál. 9. 18, see 5. 31.

(3) **पृथ्वी**

Def. जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।

Sch. G. ज, स, ज, स, य, ल, ग ( 8. 9 )

Ex. इतः स्वपिति केशवः कुलमितस्तदीयद्विषा-
मितश्च शरणार्थिनः शिखरिणां गणाः शेरते ।
इतोपि वडवानलः सह समस्तसंवर्तकै-
रहो विततमूर्जितं भरसहं च सिंधोर्वपुः॥ Bh. 2.76

(4) **मंदाक्रांता**

Def. मंदाक्रांतांबुधिरसनगैर्मो भनौ तौ गयुग्मम् ।

Sch. G. म, भ, न, त, त, ग, ग ( 4. 6. 7 )

Ex. गोपो भर्तुर्विरहविधुरा काचिदिंदीवराक्षी
उन्मत्तेव स्खलितकबरी निःश्वसंती विशालम्।
अत्रैवास्ते मुररिपुरिति भ्रांतिदूतीसहाया
त्यक्त्वा गेहं झटिति यमुनामंजुकुंजं जगाम ॥
Pad. D. 1.

(The whole of the "Meghadúta is written in this metre).

(5) **वंशपत्रपतित**

Def. दिङ्मुनिवंशपत्रपतितं भरनभनलगैः ।

Sch. G. भ, र, न, भ, न, ल, ग ( 10. 7 )

Ex. दर्पणनिर्मलासु पतिते घनतिमिरमुषि
ज्योतिषि रौप्यभित्तिषु पुरः प्रतिफलति मुहुः ।
व्रीडमसंमुखोपि रमणैरपहृतवसनाः
कांचनकंदरासु तरुणीरिह नयति रविः ॥
Si. 4. 67.

(6) **शिखरिणी.**

Def. रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी

Sch. G. य, म, न, स, भ, ल, ग ( 6. 11 )

Ex. दिगंते श्रूयंते मदमलिनगंडाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोकेस्मिन्ननुपमशिखानां पुनरयं
नखानां पांडित्यं प्रकटयतु कस्मिन् मृगपतिः ॥
Bv. 1. 2.

(7) **हरिणी**

Def. नसमरसलागः षड्वेदैर्हयैर्हरिणी मता।